
# पञ्चमः पाठः। किं मिथ्या? किं वास्तवम्?

आधुनिकं तन्त्रज्ञानं मानवस्य कृते भौतिकविकासस्य विस्तीर्णं क्षेत्रम् उद्घाटयति इति तु सत्यमेव। तथापि तन्त्रज्ञानसाधनानाम् अत्यधिकोऽपयोगः नूतनान् प्रश्नान्, विघ्नान् सामाजिकसमस्याः च निर्माति। मिथ्या तथा च वास्तवम् एतयोः मध्ये भेदः ज्ञातव्यः अस्माभिः। आधुनिककालस्य इयमेवावश्यकता। – **लेखिका – श्रीमती मुग्धा रिसबूड।**




(त्रयोदशवर्षीया तनया सुखासन्दे उपविश्य एकेन हस्तेन कुर्कुरिकां खादति। अपरेण हस्तेन चलभाषं चालयति। तदानीं द्वारघण्टिकाम् आकर्ण्य माता द्वारम् उद्घाटयति। तनयायाः सख्यौ द्वारे एव स्थित्वा ताम् आह्वयतः।)



श्रुतिः – तनये, सत्वरं क्रीडनाय आगच्छ, बहिः खेलामः।

तनया – अहं गृहे एव खेलामि।

राजसी – किं खेलसि?

तनया – (चलभाषं दर्शयित्वा) एतस्मिन् चलभाषे यष्टिकन्दुकक्रीडा, पादकन्दुकक्रीडा, वाहनक्रीडा, पत्रक्रीडा, चतुरङ्गक्रीडा, इत्यादयः सर्वाः क्रीडाः सन्ति। क्रीडाङ्गणं गत्वा खेलनस्य आवश्यकता एव नास्ति। अहं न आगच्छामि। (सख्यौ क्रीडार्थं निर्गच्छतः। माता पाकगृहं गच्छति। तनया चलभाषे युद्धक्रीडायां मग्ना।)

तनया – (स्वगतम्) एतस्यां क्रीडायाम् एषः सैनिकः मृतः अपरः च मारणीयः। ..... सर्वे सैनिकाः मृताः। हेऽऽ .....जितं मया। खेलः समाप्तः। (तनया पाकगृहं गच्छति।) अम्ब, बुभुक्षिता अस्मि।

माता – तनये, मम चलभाषे एतानि छायाचित्राणि पश्य। (तनया खाद्यपदार्थानां छायाचित्राणि पश्यति।)

तनया – मातः, पिझ्झा, पावभाजी, सिजलर्स इत्यादीनि खाद्यानि दृष्ट्वा लालायितं मे मुखम्। कृपया किमपि यच्छतु।

माता – चलभाषे दृष्टवती खलु? अधुना खाद्यपदार्थानाम् आवश्यकता एव नास्ति। अहं न यच्छामि।

तनया – चलभाषे भोजनं दृष्ट्वा बुभुक्षा शान्ता कथं भवेत्?

माता – यदि एतत् सत्यं, तर्हि कथं न जानासि यत् चलभाषेण क्रीडित्वा व्यायामः न भवति? स्वास्थ्यरक्षणं न भवति?

तनया – परं मातः, मह्यं रोचते तत् चलभाषेण क्रीडनम्।

माता – तनये, यद् यद् रोचते तत् तत् सर्वं स्वास्थ्यकरं, हितकरम्, आरोग्यपूर्णं न भवति। सम्यक् क्रीडा, पौष्टिकम् अन्नं, रात्रौ निद्रा आरोग्याय भवति। चलभाषे आभासात्मकं विश्वं न वास्तवम्।

तनया – तर्हि किं चलभाषस्य उपयोगः एव न करणीयः।

माता – तथा न। आवश्यकतानुसारं योग्यः उपयोगः करणीयः एव। किन्तु अति सर्वत्र वर्जयेत्।

तनया – आम् मातः। इतः परं चलभाषस्य योग्यम् उपयोगं करोमि।

## भाषाभ्यासः



**१. एकवाक्येन उत्तरत।**

अ. चलभाषे काः क्रीडाः सन्ति ?

आ. चलभाषे कीदृशं विश्वम् ?

इ. किं किं दृष्ट्वा तनयायाः मुखं लालायितम् ?

ई. स्वास्थ्यरक्षणाय किं किम् आवश्यकम् ?

**२. माध्यमभाषया उत्तरत।** अ) माता तनयायाः विचारपरिवर्तनं कथं करोति ?

आ) किं मिथ्या ? किं वास्तवम् ? इति पाठस्य तात्पर्यं लिखत।

**३. प्रश्ननिर्माणं कुरुत।** क) अहं गृहे एव खेलामि। ख) व्यायामं कृत्वा आरोग्यं वर्धते।

**४. अ) सन्धिविग्रहं कुरुत।** क) तदेव = ____ + एव। ख) नास्ति = न + ____।

**आ) कालवचनपरिवर्तनं कुरुत।**

१) अहं न आगच्छामि। (लङ्लकारे परिवर्तयत।)

२) बुभुक्षिता अस्मि। (बहुवचने परिवर्तयत।)

३) सख्यौ क्रीडार्थं प्रतिगच्छतः। (एकवचने लिखत।)

४) एतानि छायाचित्राणि पश्य। (उत्तमपुरुषे परिवर्तयत।)

**इ) शब्दस्य वर्णविग्रहं कुरुत।** १) द्वारम् २) स्वास्थ्यम् ३) बुभुक्षा ४) पौष्टिकम्

**ई) मेलनं कुरुत।**

| विशेष्यम् | विशेषणम् |
|---|---|
| १. बुभुक्षा | १. पौष्टिकम् |
| २. सैनिकाः | २. शान्ता |
| ३. खेलः | ३. आभासात्मकम् |
| ४. अन्नम् | ४. समाप्तः |
| ५. विश्वम् | ५. मृताः |

**उ) पाठात् त्वान्त-ल्यबन्त-अव्ययानि चिनुत लिखत च।**

**५. त्वान्तपदं /ल्यबन्तपदं निष्कास्य वाक्यं पुनर्लिखत।**

अ) रात्रौ शीघ्रं निद्रां कृत्वा प्रातःकाले शीघ्रम् उत्तिष्ठामि।

आ) द्वारघण्टिकाम् आकर्ण्य माता द्वारम् उद्घाटयति।

**६. अ) समानार्थकशब्दं चिनुत।** भटः, क्रीडा, जननी, क्षुधा, स्वापः।

**आ) विरुद्धार्थकशब्दं लिखत।** समाप्तः, स्वास्थ्यम्, आभासात्मकम्, मृतः।

**७. चलभाषद्वारा द्वयोः मित्रयोः संवादं लिखत।**

# रम्यसंस्कृतम् ।   कः कृतवान् ? का कृतवती ?



बालः जलं पिबति ।



बालः जलं **पीतवान्** ।



अनीशः गच्छति ।



अनीशः **गतवान्** ।



छात्राः खेलन्ति ।



छात्राः **खेलितवन्तः** ।



वयं पठामः ।



वयं **पठितवन्तः** ।



महिला क्षिपति ।



महिला **क्षिप्तवती** ।



दीपा नृत्यति ।



दीपा **नर्तितवती** ।



ताः प्रक्षालयन्ति ।



ताः **प्रक्षालितवत्यः** ।



छात्राः लिखन्ति ।



छात्राः **लिखितवत्यः** ।

पीतवान्, गतवान्, खेलितवन्तः, पठितवन्तः इत्यादीनि भूतकालवाचकानि क्तवतु-प्रत्ययान्त-विशेषणानि ।

## सम्भाषापत्रम्



### १. मेलनं कुरुत ।

| | |
|---|---|
| १. शिक्षकाः | सुप्तवती । |
| २. बालिकाः | प्रविष्टवन्तः । |
| ३. रक्षकः | पूजितवत्यः । |
| ४. बिडाली | ताडितवान् । |

### २. शुद्धं वा अशुद्धम् ?

१. सिंहः तं हतवान् ।
२. ते बालकाः अन्नं न त्यक्तवन्तः ।
३. आपणिकः देवं नतवती ।
४. एताः अद्य क्रीडितवन्तः ।
५. अहं शाकानि कर्तितवान् ।

### ३. तालिकां पूरयत।

| | सः | ते | सा | ताः |
|---|---|---|---|---|
| खादति | खादितवान् | खादितवन्तः | खादितवती | खादितवत्यः |
| करोति | कृतवान् | कृतवन्तः | कृतवती | कृतवत्यः |
| वदति | | | उदितवती | |
| पश्यति | | दृष्टवन्तः | | |
| गायति | | | | गीतवत्यः |
| मिलति | मिलितवान् | | | |
| उपविशति | | उपविष्टवन्तः | | |
| उत्तिष्ठति | | | | उत्थितवत्यः |
| स्मरति | | | स्मृतवती | |
| नयति | नीतवान् | | | |
| यच्छति | | | | दत्तवत्यः |
| पूजयति | | पूजितवन्तः | | |
| स्नाति | | | स्नातवती | |
| प्राप्नोति | प्राप्तवान् | | | |
| लभते | | | | लब्धवत्यः |

### ४. परिच्छेदे क्तवतु-रूपाणि अधोरेखितानि कुरुत।

दीपावलि-उत्सवसमयः आसीत्। जनाः गृहाणि स्वच्छीकृतवन्तः। माता मिष्टान्नानि कृतवती। जनकः नूतनवस्त्राणि क्रीतवान् किन्तु स्फोटकानि न आनीतवान्। भगिनी सुन्दरीं रङ्गवल्लीम् आलिखितवती। महिलाः मृद्दीपान् प्रज्वाल्य स्थापितवत्यः। अहं मित्रैः सह भ्रमणार्थं बहिः गतवान्। सर्वत्र हर्षः प्रकाशः च।

### ५. लङ्लकारस्य स्थाने क्तवतु-रूपाणि योजयित्वा परिच्छेदं लिखत।

गते रविवासरे वयं सर्वे भ्रमणार्थम् अगच्छाम। मातुलः विविधफलानि आनयत्। भ्रातरः क्रीडासाहित्यं समचिन्वन्। पितृव्या कूप्यः अपूरयत। अन्ये यानेन अगच्छन्। अहं मम पित्रा सह द्विचक्रिकया अगच्छम्। तत्र वयं विविधाः क्रीडाः अक्रीडाम। मातुलानी मधुरं गीतम् अगायत्। भगिन्यः अपि बहूनि गीतानि अगायन्। मध्याह्ने माता कटम् अस्थापयत् भोजनसाहित्यं च अरचयत।

**पठत अवगच्छत !** — **स्वराणां सृष्टिः।**

**सन्धिविग्रहं कृत्वा परिच्छेदं लिखत।**

अहं कृषकः। नास्ति अस्माकं जीवने स्थिरता। तथापि आदिनं वयं क्षेत्रे श्राम्यामः। अधुना तु विविधानि यन्त्राण्यपि सहायकानि भवन्ति। तज्ज्ञानां कृषिविषयकं मार्गदर्शनम् अप्युपयुक्तम्। आकाशवाण्यैव वयं कृषिविषयकान् कार्यक्रमान् आकर्णयामः। एतेनैव वयं विकसिताः भवामः। इतः अप्यधिकं साहाय्यम् आवश्यकम् एव। तन्त्रज्ञानेनाहं परिपूर्णः। अहमपि देशस्य विकासायैव श्राम्यामि। यतः कृषिविकासेनैव राष्ट्रं वैभवं विन्दतीति निश्चितम्।

CILP9H